International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(1): 31-32
© 2021 IJSR
www.anantaajournal.com
Received: 16-11-2020
Accepted: 23-12-2020

**कमलिनीपण्डा**
अद्यापिका संस्कृतविभाग:, मेघासन् महाविद्यालय:, दुदडिहा, उड़िशा, भारत

**Corresponding Author:**
**कमलिनीपण्डा**
अद्यापिका संस्कृतविभाग:, मेघासन् महाविद्यालय:, दुदडिहा, उड़िशा, भारत

# संस्कृतिसंस्कृतसंरक्षणे मठमन्दिराणां भूमिका

**कमलिनीपण्डा**

**आमुखम्**

विषयस्यास्य मुख्यं भवति संस्कृतम्, सत: संस्कृति: अत: मठमन्दिराणां स्थिति: । एतत्सर्वविवेचनासमये अहं सूचीकटाह: न्यायेन संस्कृतम् अधीकृत्य पश्चात् वदामि । इदानीं संस्कृति: का इति विवेचयाम । जनानां तत्र तियानां तत्र तियानां जनानां चलनपद्धति: । अर्थात् शीतप्रधानाचंले या चलनपद्धति: मरुभूमौ सा न अतएव तेषां तेषां जनानां तत्र तत्र पद्धतिरेव अत्र त्वात् संस्कृति: । एवं मनीषिणां मुनीनां च या व्यवहारपद्धति: सा अस्माकं प्रचीना संस्कृति: रीति: परिचीयते । या तु केवलं व्याजेन परिपुष्टा । सोयं त्याग: शरीर: मानस: वाणीगतश्चेति त्रिविध: भवति । अर्थात् मूल: कोमलेन वचसा दु:खिन: आश्वासयन्ति । आश्रमेषु आश्रं दत्वा तेषां दु:खलाघवं कुर्वन्ति । पाणीनां आमृष्य तेषां शारीरं दु:खं अपहरन्ति । मानसया प्रार्थनया इश्वरात् आशी: समानीय एषु दु:खितेषु वितरन्ति । एषा आश्वादं प्रचीना संस्कृति । गीतायाम् कर्मयोगे भगवत् श्रीकृष्णेन वर्णितम् आह:-

यद् यदाचरति श्रेष्ठस्तत्तदेवेतरो जन: ।
स यत् प्रमाणं कुरुते लोकस्तदनुवत्तते ।। ३/२१

अस्यार्थं तदानीं मुनय: यत् यथा आचरन् साधारणजना: तद् तत् विक्ष्य तथा आचरन्ति स्म । ते यथा यथा उपदिशन्ति स्म इतरे तथा तथा जीवने तान् उपदेशान् व्यवहरन्ति स्म । एवं क्रमेण चलनपद्धति: प्रवत्तते । एषा चलनपद्धति: संस्कृतिपदेन परीचियते। अनया संस्कृत्या: संसारे चलनं साधारणजीवननिर्वाहश्च सुखकर: भवति । फलेन संस्कृति क्रमश: व्याप्नति । संस्कृतिनां प्रसाराय क्रमश: ग्रामेषु मुनिनां कुमारा: शिष्याश्च आश्रमा विदधु: । तत्र तत्र आश्रमेषु तत्रत्यानां नागरीकानां सुख दु:ख विचारा: तयी विविता । इदानीं यावत् मया प्राग् वोद्धसभ्यता लिख्यते ।

अथ वोद्धयुगे भगवान् तथागत: परिव्राजक: सन् समग्रं आर्यभूमि: विचार: । स जनानां अन्तरेभ्य: हिंसा द्वेष प्रभृति कुप्रवृत्ति विनाशाय मुख्येषु अग्रहारेषु शिष्यान् अवस्थाप्य मठस्थापनां अकरोत् । तद् वीक्ष्य भगवान् जगदगुरु: शंकर: अपि मुख्येषु मुख्येषु स्थानेषु मठान् निर्ममे । तथा च अमरकोषे मठच्छात्रादि नीलय: । मठे: च्छात्रान् अवस्थाप्य पाठपठनं विधीयते स्म । तेन ज्ञानप्रसार:, व्यवहारशोध: समभवत् । एष: मठपरिचय: । मठान् अवलोक्य ग्रामीणा: जना: स्वग्राममन्दिरेषु संस्कृतविद्यालयानां स्थापनं कृतवन्त: । यस्य चिह्न स्वरूपेण अद्यापि श्रीजगन्नाथमन्दिरमध्ये, भगवत्याविरजायामन्दिरमध्ये, श्रृङ्गेरय्यां च विद्यालया: विराजन्ते । ग्रामेषु अपि वहुषु लक्ष्मीनृसिंह संस्कृतविद्यालयाद्योय: भारतम् परित: विराजन्ते । सर्वे एते संस्कृतम् संस्कृतिम्, ज्ञानं, कर्मकाण्डं, ज्योर्तिविज्ञानं, आयुर्वेदं च प्रसारयन्ति प्रचारयन्ति च ।

मठमन्दिराणां संस्कृतसंस्कृतिविषये मया संक्षेप लेखा विहिता । इदानीं अपि श्रीलङ्कायां वोद्धमठेषु संस्कृत व्याकरणान् प्रश्चदर्शनानां, कोषानां च गभीरत्वया गवेषणा विधीयते । अथ संस्कृतम् । संस्कृतवाङ्गमयं ब्रह्मणोवदनकोमलात् आरभ्य इदानीम् आधुनिकसंस्कृतकविदार्शनिक संप्रदायं यावत् विशालं विस्मृत्यं भवति । यत्र आत्मतत्वं, शरीररक्षा, आरोग्यं, मनोयमनम्, मनोवलप्रयोग:, मन: साधना, आत्मवलेनमननियोग:, मनोवलप्रयोगेण शरीरेण असाद्यसाधनविचार:, विशालस्य विश्वस्य खगलशास्त्रेणविचार: । इश्वरेणविश्वस्यसम्वन्ध:, द्रव्यगुणविचार:, देशजप्रयोग:, मन्त्रचिकित्सा, मन्त्राणांआविष्कार:, दर्शनानांविचार:, सत्यानुभवायप्रेरणां परिपूर्णा अस्ति ।

अथ कलाभाष्कर्य - स्थापत्यविचार: - कला – नृत्यकला – संङ्गीतकला – चित्रकला –भाष्कर्यकला – मूर्त्तिकला – इति स्थुलतया विधीयन्ते । एषां कलानां स्थिति: मठेषु मन्दिरेषु च विराजते ।

मठमन्दिरेषु चित्रकलानां मूर्त्तिकलानां च वहुलत्वया व्यवहार: दृश्यते । तत्र निर्मितेषु मुर्त्तिषु अपि मनोरमा: श्रृङ्गारवन्धा: उट्टङ्किंता दृश्यन्ते । प्रतिदिनं प्रभाते सायं च प्रार्थना: सुमधुर संगीतगानेन तथा नर्त्तकीनां चटुलचरणपातेन नृत्यरीति प्रत्योहं विधीयते । तथा च मेघदूते कालिदास: वर्णितम् यत् –

पादन्यासै: कणितरशनास्तत्र लीलावधूतै
रत्नच्छायाखचितवलिभिश्चामरै: वलान्तहस्ता: ।
वेश्यास्त्वत्तो नखपदसुखानप्राप्य वर्षाग्रविन्दु –
नामोक्ष्यन्ते त्वचि मधुकरश्रेणिदीर्घानकटाक्षान् ।।
(पूर्वमेघे: ३८. पृ. १२७ मल्लिन्नाथटीका:)

अत्र महाकाल महारूद्रस्य नृत्यसेवा वर्णनावसरे वर्णितवान् । श्रीजगन्नाथमन्दिरस्य पूर्य्यां भगवत: रात्रौ शयनात् पूर्वं श्रीगीतगोविन्द नृत्य विर्धिविधीयते । एवं रीत्या मठमन्दिर माध्यमेन अस्माकं संस्कृतम् संस्कृतिश्च प्रसारिता परिवर्द्धिता नीत्यनूतनरूपं ददानां अद्यापि वैदेशिकानां जनमनांसि आकृष्य विविध मठमाध्यमेन भारत प्रति समानयति । भगवतो जगन्नाथस्य शोणयात्रायां वैदेशिकानां मनोहरं नृत्यं अत्रत्यानां भक्तानां अपि हृदयानि समाकृष्य चमत्करोति ।

**उपसंहार:**

एवं संक्षेपका: अत: मठमन्दिराणां भूमिका अस्माकं संस्कृत संस्कृति संरक्षण विषये मया पर्यालोचिता । परन्तु दु:खस्य विषयं यत् मठानां मन्दिराणां च अवक्षय संजात: फलेन पूर्य्यां प्रतिमठं ये प्रसिद्धा: विद्यालयासन् ते सर्वे द्रष्टा: । भद्रेक सदाव्रत: मठ परिसरे संस्कृत विद्यालय अद्यापि सगर्वम् महाविद्यालयत्वेन परिचितं सत् विराजते । अन्येषु मठेषु तथा मन्दिरेषु च संस्कृतविद्यालय ध्वंसाय शासनस्य निष्ठुरता उत्तरदायिनी अवश्यम् । एतत् अर्थं अहं जनचेतनां कामयामि ।

**सहायक ग्रन्थसूची**

1. मेघदुतम्, पाढी प्रमोदकुमार, कल्याणी पब्लिकेसन्, कटक, २०१४ ।
2. संस्कृत साहित्योतिहास, शतपथी हरेकृष्ण, कल्याणी पब्लिकेसन्, २०१०।